**अवधारणा {AWADHARANA}**
{A Peer-Reviewed Multidisciplinary, Open Access & NepJOL Indexed Journal}
Volume 9, 2025 {Print ISSN: 2505-080x}
Email: loktantrik066@gmail.com
URL: https://nepjol.info/index.php/awadharana
Copyrights: *Copyright 2025 Author/s and Creative Democrat Academy, Pokhara, Nepal. This work is licensed under a Creative Commons Attribution- Non Commercial* 4.0 International License
***Publisher***
*Creative Democrat Academy*

# पाणिनीयव्याकरणे उपसर्जनसंज्ञाविचारः

**डा. जगन्नाथः शर्मा {Dr. Jagannath Sharma}**

महेशसंस्कृतगुरुकुलविद्यापीठम्, देवघाट, तनहुँ

{Mahesh Sanskrit Bidhyapeeth, Debhaghat, Tanahun}

**Article History:**
Receved 27 July 2025, Reviewed 29 August 2025, Accepted 23 October 2025

**Corresponding Author:**
Jagannath Sharma; Email : jagannathsharma9847@gmail.com
ORCID ID : https://orcid.org/0009-0002-0708-7826
DOI : https://doi.org/10.3126/awadharana.v9i1.86196

## सारः

शब्दसाधुत्वावबोधार्थं भगवता पाणिनिना अष्टाध्याय्यां यथालाघवं कार्यसम्पत्तये विविधाः संज्ञाः परिकल्पिताः । ताश्च संज्ञाः तिस्रः - यथासम्भवं लघीयस्यः, अन्वर्थसंज्ञाः, प्राचीनानुसारिण्यश्च । तथा हि – 'संज्ञा च नाम न यतो लघीयः'(महाभाष्यवचनम्.१.४.२३) इति न्यायेन परिकल्पिताः 'अ इत्यष्टादशानां संज्ञा' (सिद्धान्तकौमुदी, १४), "अचोऽन्त्यादि टि" (पाणिनिसूत्रम्,१.१.६४) इत्यादयः संज्ञाः लघीयस्यः संज्ञाः । "महत्याः संज्ञायाः करणे एतत् प्रयोजनम्" (महाभाष्यवचनम्.१.४.२३) इति न्यायेनोपदिष्टाः महासंज्ञाः यथा सर्वनाम,सम्प्रसारणम् संज्ञाः, तृतीयाश्च संज्ञाः तादृश्यः, यासां गुरूभूतत्वेऽपि अदृष्टप्रयोजनकाः प्राचीनानुसारेण विहिताः यथा, प्रथमामध्यमाप्रातिपदिकादयः संज्ञाः । एतासु विविधासु संज्ञासु समासस्थले विशेषतः पूर्वनिपाताय, उपसर्जनह्रस्वाय च परिकल्पितेयमन्यतमा संज्ञा उपसर्जनसंज्ञा नाम । यद्यपि उपेत्युपसर्गपूर्वकसृज्धातोः ल्युटि सिद्धोऽयं शब्दः उपसर्जनमिति दर्शनान्तरेष्विवेहापि शास्त्रे अप्रधानाद्यर्थेषु विद्यते, तथापि पाणिनिव्याकरणे शास्त्रबोधितमुपसर्जनं पारिभाषिकञ्च विद्यते । अष्टाध्याय्यां प्रथमाध्यायस्य द्वितीयपादे एतत्संज्ञाया विधायके द्वे सूत्रे स्तः- "प्रथमानिर्दिष्टं समास उपसर्जनम्"( अष्टाध्यायी, १.२.४३), "एकविभक्ति चापूर्वनिपाते"( अष्टाध्यायी, १.२.४४)

इति । प्रसङ्गेऽस्मिन् एतस्याः संज्ञायाः प्रवृत्तिस्थलानि, संज्ञाविधायकशास्त्रार्थचिन्तनम्, संज्ञाया असाधारणानि प्रयोजनानि, महासंज्ञायाः प्रयोजनम्, संज्ञाया विधाने प्रसक्तानां समेषाम् अव्याप्ति–**अ**तिव्याप्ति–**अ**सम्भवादिदूषणानां परिहारः, सूत्रार्थनिर्णये प्रसक्ता अनुपपत्तयः, तत्समाधानानि च यथाकरं प्राचीनानां नवीनानाञ्च आचार्याणां मतेन विचार्यन्ते । एतस्याश्च संज्ञाया समाससंज्ञायां प्रवृत्तायामेव जायमानत्वेन ततः पूर्वं समाससंज्ञायाः परिचयः प्रकाश्यते। अथ च समासस्य लक्षणं तस्य प्रसिद्धा अप्रसिद्धाश्च भेदाः, तेषामुदाहरणमित्यादयो विषया प्रसङ्गप्राप्ताः यथालघु स्पष्टीकरिष्यन्ते।

**शब्दकुञ्जी :** अपूर्वनिपातः, उपसर्जनम्, एकविभक्ति, प्रथमानिर्दिष्टम्, विग्रहः ।

## विषयप्रवेशः

पाणिनीये व्याकरणे क्वचित् सूत्रेषु अप्रधानार्थक उपसर्जनशब्द उपलभ्यते, यथा – "अनुपसर्जनात्" (अष्टाध्यायी, ४.१.१४), "वोपसर्जनस्य" (अष्टाध्यायी, ६.३.८२) इत्यादिषु । क्वचिच्च पारिभाषिकमुपसर्जनपदं यथा "गोस्त्रियोरूपसर्जनस्य" (अष्टाध्यायी, १.२.४८), "उपसर्जनं पूर्वम्" ( अष्टाध्यायी, २.२.३०) इत्यादिषु । तत्र "उभयगतिरिह भवति" (परिभाषेन्दुशेखरः, प.सं-९) इति न्यायेन द्विविधस्याप्युपयोगः शास्त्रेऽस्मिन्नुपलभ्यते । पारिभाषिकोपसर्जनसंज्ञाविधायकं च शास्त्रद्वयं विद्यते -"प्रथमानिर्दिष्टं समास उपसर्जनम्", "एकविभक्ति चापूर्वनिपाते" इति । अतः प्रसङ्गेऽस्मिन् सूत्रद्वयपरिचयपूर्वकं प्रकरणमिदं सविस्तरं यथाकरं व्याख्यायते ।

## शोधसमस्या

यद्यपि उपसर्जनसंज्ञेयं पाणिनीये न गौरवी, तथापि पूर्वनिपातरूपविशेषकार्यव्यवस्थापकत्वेन अनेकलक्ष्यसङ्ग्राहकत्वात् एतत्संज्ञाविधायकशास्त्राणां तावल्लक्ष्यसङ्ग्राहकत्त्वादनुगमने चासारल्यादवश्यमेवास्या विचारणीयत्वं विद्यते । तद्व्याजेन च यद्यपि बहवः विचारा इह विचार्यन्ते, तथापि प्राधान्येन अवश्यमेव प्रकृतेन लेखेन इमे प्रश्नाः समस्यारूपेणात्र समायान्ति –

क) उपसर्जनमिति महत्याः संज्ञायाः करणे किं प्रयोजनम् ?

ख) राज्ञः कुमारीं श्रितः इत्यत्र "द्वितीया श्रितेति" समासे कुमारीराजश्रितः इति रूपं कुतो न ?

ग) पूर्वनिपातप्रकरणे 'प्रथमानिर्दिष्टं समासे' इति पठनेनैव पूर्वनिपातसिद्धेः संज्ञाकथनं किमर्थम्?

घ) 'चित्रा गावो यस्य' इति विग्रहे कमपेक्ष्य कस्य नियतविभक्त्यन्तत्वम् ?

ङ) परिनिष्ठितविभक्त्यन्तेन समासे किं प्रमाणम् ?

## शोधोद्देश्यम्

उपरि प्रदत्तानां समस्यात्मकप्रश्नानां समाधानमेवास्य शोधस्योद्देश्यमस्ति –

क) उपसर्जनमिति महत्याः संज्ञायाः करणे प्रयोजननिरूपणम् ।
ख) राज्ञः कुमारीं श्रितः इत्यत्र "द्वितीया श्रितेति" समासे कुमारीराजश्रितः इति रूपस्य साधनम् ।
ग) पूर्वनिपातप्रकरणे 'प्रथमानिर्दिष्टं समासे' इति पठनेनैव पूर्वनिपातसिद्धेः संज्ञाकथनस्य कारणविवेचनम् ।
घ) 'चित्रा गावो यस्य' इति विग्रहे नियतविभक्त्यन्तत्वविश्लेषणम् ।
ङ) परिनिष्ठितविभक्त्यन्तेन समासे प्रमाणनिरूपणम् ।

## पूर्वकार्यसमीक्षणम्

उपसर्जनेयं संज्ञा यद्यपि पाणिनीये व्याकरणे प्रसिद्धतमा, तथापि एतस्याः संज्ञायाः विधायकस्य शास्त्रस्य प्रकियायां बहुधोपयोगित्वेऽपि व्याख्यानादिसन्दर्भे न तावतीमभिरूचिं विदुषां पर्यालोचयामि । न तावदेवापि तु दीक्षितैः नागेशभट्टैश्च यथाभाष्यमेतस्याः विषये परिशीलनात्परं तेषामन्यविषयेषु नितान्तं विमर्शका गुरूप्रसादविजयाज्योत्स्नाप्रभृतयो व्याख्याकृतोऽपि बहवोऽस्यां संज्ञायामव्ययीभावप्रकरणे कौमुद्यां पठितायां स्वरूचिं न्यूनीचक्रुः । केचनैव वरवर्णिनीकाराः दीपककारा इमां व्याख्यन्। अत एव एतस्याः संज्ञायाः विषये मया भृशमन्वेषणेऽपि नेत्थं समीक्षका दृष्टिपथं समायुरिति सर्वथापूर्वोऽयं विमर्शः ।

## अध्ययनविधिः

आलेखस्यास्य निष्पादनायावश्यकसामग्रीसङ्कलनाय च विशेषरूपेण पुस्तकालयीयाध्ययनविधिरेवात्राङ्गीकृतोऽस्ति । उपसर्जनस्वरूपपरिज्ञानाय पाणिनीयाष्टाध्यायीग्रन्थः, नागेशस्य सर्वेऽपि ग्रन्थास्तथा समासविषयसम्बद्धाः विदुषामालेखाश्च अध्ययनस्यास्य प्रमुखसामग्रीत्वेनोरीकृताः सन्ति । क्वचित् गभीरविषयविचारसरणौ स्वोपज्ञपद्धतिश्चावलम्बिता वर्तते । विशेषतो लेखस्यास्य निष्पादने APA पद्धतिः स्वीकृतास्ति ।

**पाणिनीयव्याकरणे उपसर्जनसंज्ञाविचारः**

उपसर्जनेयं संज्ञा पाणिनीये व्याकरणे समाससंज्ञाधीना भवति इत्यतः पूर्वं प्रसङ्गसङ्गत्या सुसंक्षेपं उपसर्जनसंज्ञानिरूपणाङ्गत्त्वेन समाससामान्यस्य तद्विशेषस्य च परिचय इह विधास्यते ।

**समासपरिचयः**

समसनं समासः। समसनं नाम द्वयोः पदयोः बहूनां वा पदानां सम्भूय एकार्थविषयकोपस्थितिजनकत्त्वम्। अत एव हि समासे वैयाकरणैः एकार्थीभाववृत्तिरङ्गीकृता। भिन्नभिन्नार्थोपस्थापकानां पदानां एकार्थोपस्थितिजनकत्त्वमेव एकार्थीभावः।यथा राज्ञः पुरूषः इति वाक्यप्रयेगे सति राजनिष्ठस्वामित्त्वनिरूपितस्वत्त्ववान् पुरूषः इति बोधो भवति। स एव च बोधः

समासे सति राजपुरूषः इत्यत्रापि भवति, परन्तु तत्र विशेषणान्वयः, संख्याविशेषावगमः, इत्यादयः धर्माः न भवन्ति, स एव च एकार्थीभावकृतविशेषो बोध्यः।

समासस्य च वैयाकरणनिकाये द्विधा विभागो दृश्यते। "समासस्तु चतुर्धेति प्रायोवादस्तथापरः" (वैयाकरणमतोन्मज्जनकारिका, का.सं- २९) इत्यादिना विवक्षिताः अव्ययीभावतत्पुरूषबहुव्रीहिद्वन्द्वभेदेन चत्त्वारः भेदाः समासस्य इति प्राचीनवैयाकरणाः । परन्तु अनेन भूतपूर्वः, कटप्रूः इत्यादीनामुदाहरणानां सङ्ग्रहस्यासम्भवात् अयं केवलं प्रायोवादः, न तु भेदकथनमित्यभिप्रेत्य यथामहाभाष्यमभिहितान्

सुपां सुपा तिङा नाम्ना धातुनाऽथ तिङां तिङा

सुबन्तेनेति विज्ञेयः समासः षड्विधो बुधैः॥ (वैयाकरणमतोन्मज्जनकारिका, का.सं- २८॥)

षोढा समासस्य भेदानङ्गीकुर्वते दीक्षितादयः नवीनाः। तावतापि क्रमेण प्रायः पूर्वोत्तरान्योभयपदार्थप्राधान्येन अव्ययीभावतत्पुरूषबहुव्रीहिद्वन्द्वानामर्थनिर्णये उपयोगित्त्वेन एवमेव ग्रन्थेषु व्यवहारः दरीदृश्यते।

**समासविशेषपरिचयः**

***अव्ययीभावः***

"अव्ययीभावः"(अष्टाध्यायी, २.१.५) इति शास्त्रस्य अधिकारे विद्यमानैः शास्त्रैः समासोऽयं विधीयते। अनव्ययं अव्ययं सम्पद्यते इति व्युत्पत्त्या अव्ययीभावसमासे विहिते उपकुम्भम् इत्यादौ विशेषविधेः अभावे सामान्यतः सर्वेषु वचनेषु सर्वासु च विभक्तिषु उपकुम्भमित्येव प्रयुज्यते। अयञ्च समासः प्रायः पूर्वपदार्थप्रधानो भवति। यथा उपकृष्णम् इत्यस्य कृष्णसमीपमित्यर्थो भवति। प्रायः इति कथनात् उन्मत्तगङ्गमित्यादौ अन्यपदार्थप्राधान्येऽपि न क्षतिः। निष्कृष्टमस्य लक्षणं तु अव्ययीभावः इति शास्त्राधिकारे पठितत्वम् अव्ययीभावत्वमिति ज्ञेयम्।

***तत्पुरूषः***

"तत्पुरूषः" (अष्टाध्यायी, २.१.२२) इति शास्त्रस्य अधिकारे विद्यमानैः शास्त्रैः समासोऽयं विधीयते। तत्पुरूषश्च समानाधिकरणश्चेत् "तत्पुरुषः समानाधिकरणः कर्मधारयः" (अष्टाध्यायी, १.२.४२) इति शास्त्रबलात् कर्मधारयसंज्ञको भवति । यथा नीलञ्च तदुत्पलं नीलोत्पलम् इति।कर्मधारयोऽपि यदि संख्यापूर्वः तदा "संख्यापूर्वो द्विगुः" (अष्टाध्यायी, २.१.५२) इति शास्त्रबलात् द्विगुसंज्ञको भवति । एवञ्च द्वितीयामारभ्य सप्तमीपर्यन्तं तत्तच्छास्त्रैः तत्तद्विभक्त्यन्तेन सह समासो विधीयते । कृष्णश्रितः, शङ्कुलाखण्डः, भूतबलिः, व्याघ्रभयम्, राजपुरूषः, अक्षशौण्डः इत्यादीनि क्रमेण द्वितीयातृतीयाचतुर्थीपञ्चमीषष्ठीसप्तमीतत्पुरूषाणामुदाहरणानि । अस्मिंश्च समासे प्रायः उत्तरपदार्थप्रधान्यं भवति। यथा राजपुरुषः इत्यत्र राजसम्बन्धी पुरूषः इत्यर्थः। क्वचित्

अर्धपिप्पली इत्यादौ पूर्वपदार्थप्राधान्यात् प्रायः इति कथनम् । तत्पुरूषः इति शास्त्राधिकारे पठितत्वम् तत्पुरूषत्वमिति समासस्यास्य लक्षणम्।

***बहुव्रीहिः***

"शेषो बहुव्रीहिः"(अष्टाध्यायी, २.२.२३) इति शास्त्रस्य अधिकारे विद्यमानैः शास्त्रैः समासोऽयं विधीयते। तत्र शास्त्रे शेषः इत्यनेन प्रथमान्तस्य परामर्शेन प्रायः प्रथमान्तानामेव बहुव्रीहिः समासो भवति। "सप्तमीविशेषणे बहुव्रीहौ" (अष्टाध्यायी, २.२.३५) इति ज्ञापकात् क्वचित् कण्ठेकालः इत्यादौ व्यधिकरणबहुव्रीहिरपि बोध्यः। इह च समासे प्रायः अन्यपदार्थप्राधान्यं भवति। अन्यदार्थे च अन्यश्च वृत्तिघटकवर्तिपदार्थप्रतियोगिको विवक्षितः। यथा पीताम्बरः इत्यत्र पीतमम्बरं यस्य इति विग्रहे पीतपदार्थाम्बरपदार्थादन्यः विष्णुपदार्थः प्राधान्येनावगम्यते । प्रायः इति कथनाच्च क्वचित् द्वित्राः इत्यादौ वर्तिपदार्थस्यैव प्राधान्यमिति बोध्यम् । बहुव्रीह्यधिकारे पठितत्वञ्च अस्य लक्षणम् ।

***द्वन्द्वः***

"चार्थे द्वन्द्वः" (अष्टाध्यायी, २.२.२९) इति शास्त्रेण विधीयमानोऽयं समासः। चार्थाश्च समुच्चयान्वाचयेतरयोगसमाहाराः बोध्याः। तेषु चतुर्षु अर्थेषु द्वयोः समुच्चयान्वाचययोः अस्मार्थ्यात् समासो न भवति, केवलमितरेतरयोगे समाहारे च समासो भवति। इतरेतरयोगे पदार्थानामनेकत्त्वेन प्रतीतिः भवति । यथा रामश्च कृष्णश्च इति रामकृष्णौ । इह च परपदस्य यल्लिङ्गं तल्लिङ्गमेव कृत्स्नस्य पदस्य इति "परवल्लिङ्गं द्वन्द्वतत्पुरूषयोः"(अष्टाध्यायी, २.४.३६) इति शास्त्रेणाभिधीयते। समाहारे च एकत्त्वं नित्यनपुंसकत्वमिति सिद्धान्तः। यथा रामकृष्णमित्यत्र । इह हि रामकृष्णयोः समुदायः अतिरिक्तः प्रतीयते । इतरेतरयोगे उभयपदार्थप्राधान्ये सत्त्वेऽपि समाहारे अन्यस्य समाहारस्य प्राधान्यात् प्रायः इति वक्तव्यम् । लक्षणं तु द्वन्द्वाधिकारे पठितत्वमिति निष्कर्षः।

## उपसर्जनसंज्ञाविमर्शः

### आद्यसूत्रव्याख्यानम्

"प्रथमानिर्दिष्टं समास उपसर्जनम्" इति पदचतुष्टयात्मकमुपसर्जनसंज्ञाविधायकम् संज्ञासूत्रमिदम् । समासे प्रथमया निर्दिष्टमुपसर्जनमित्यर्थे सति कष्टं श्रितः इत्यत्र समासेऽन्तर्वर्तिन्या विभक्त्या श्रित इत्यस्य प्रथमानिर्दिष्टत्वात् पूर्वनिपातापत्तिः स्यात्, अतः समास इति पदं न यथाश्रुतार्थकमपि तु तद्विधायकशास्त्रे लाक्षणिकम् । एवञ्च समासविधायकशास्त्रे इत्यर्थः ।न च लक्षणायां प्रमाणाभाव इति वाच्यम्, सूत्रे निर्दिष्टे इति वचनस्यैव प्रमाणत्वात्, अन्यथा समासे विद्यमानं प्रथमान्तमुपसर्जनमित्यर्थेन सिद्धे सूत्रे तद्वचनं व्यर्थं स्यादिति विचिन्त्य श्रीमद्भिः भट्टोजिदीक्षितैः कौमुद्यामर्थोऽभिहितः- समासशास्त्रे प्रथमानिर्दिष्टमुपसर्जनसंज्ञं स्यात्

इति । एवञ्च विधेयतासमर्पकसमासपदघटितशास्त्रघटकप्रथमान्तपदप्रयोज्यविषयताश्रय उपसर्जनमिति सूत्रार्थः पर्यवस्यति । यथा कष्टं श्रित इत्यत्र समासविधायकं शास्त्रं "द्वितीया श्रितातीतपतितगतात्यस्तप्राप्तापन्नैः"(अष्टाध्यायी, २.१.२४) इति शास्त्रम्, तादृशे विधेयतासमर्पकसमासपदघटितशास्त्रे घटकं यत् प्रथमान्तं पदं 'द्वितीया' इति, तत्प्रयोज्यविषयताश्रयः 'कष्टम्' इति, तस्यानेन उपसर्जनसंज्ञायाम् "उपसर्जनं पूर्वम्" इति शास्त्रेण तस्य पूर्वनिपातो भवति ।

**महासंज्ञाकरणप्रयोजनचिन्तनम्**

नन्वेवमपि राज्ञः कुमारीं श्रितः इति विग्रहे "द्वितीया श्रितातीत..." इत्यादिना समासे कुमारीशब्दस्य च द्वितीयान्तत्वेन पूर्वनिपातापत्त्या राजकुमारीश्रितः इति रूपं न स्यात्, न च राज्ञः कुमारी इति विग्रहे "षष्ठी" इति शास्त्रेण समासे पुनश्च राजकुमारीं श्रितः इति विग्रहेण "द्वितीया श्रितातीते" त्यादिना समासे केवलस्य कुमारीशब्दस्य न कथञ्चिदपि द्वितीयान्ततयोपसर्जनसंज्ञाप्रसक्तिरिति वाच्यम्, परिनिष्ठितविभक्त्यन्तेन समास इति पक्षे राज्ञः कुमारीम् (श्रितः) इति विग्रहे राजन् ङस् कुमारी अम् इत्यलौकिकविग्रहे पूर्वं षष्ठीसमासे विहिते, पुनश्च राजकुमारीं श्रितः इति विग्रहे राजकुमारीपदस्येवान्तर्वर्तिन्या विभक्त्या कुमारीपदस्यापि द्वितीयान्तत्वेन तस्योपसर्जनसंज्ञाया दुर्वारत्वात्, न च परिनिष्ठितान्तेन समास इति पक्ष एव न साधीयानिति वाच्यम्, "एकविभक्ति चापूर्वनिपाते" इति शास्त्रस्यैव तत्र प्रमाणत्वात् । तथा हि – विग्रहे यन्नियतविभक्तिकम्, पूर्वनिपातभिन्नकार्ये करणीये तदुपसर्जनसंज्ञं भवति इत्येतस्य शास्त्रस्यार्थः । यथा 'कौशाम्ब्याः निष्क्रान्तः' इति विग्रहे कौशाम्बीपदे पञ्चम्याः नियतत्वेन निष्क्रान्त इत्यत्र च 'कौशाम्ब्याः निष्क्रान्तम्, निष्क्रान्तेन, निष्क्रान्ताय..' इत्यादिरीत्याऽनियतविभक्तिकत्वेन "एकविभक्ति चापूर्वनिपाते" इत्यनेन शास्त्रेण कौशाम्ब्या उपसर्जनसंज्ञायां विहितायां "गोस्त्रियोरूपसर्जनस्य" इति सूत्रेण उपसर्जनह्रस्वत्वे विहिते च 'निष्कौशाम्बिः' इति रूपं सिद्ध्यति ।अपूर्वनिपाते करणीये एव संज्ञाविधानान्न पूर्वनिपातापत्तिरिति बोध्यम् । ननु 'निष्क्रान्तः कौशाम्ब्याः' इति प्रथमान्तेनैव विग्रहस्य प्रामाणिकत्वेन 'निष्क्रान्त' इत्यस्यापि नियतविभक्तिकत्त्वेन कथं कोशाम्ब्या नियतविभक्तिकत्वनिर्णयः? इति चेत्, सत्यमस्मादेव ज्ञापकात् परिनिष्ठितविभक्त्यन्तेनापि समास इति पक्षस्य ज्ञापनात् । अन्यथा हि पूर्वोक्तरीत्या सर्वस्यापि नियतविभक्तिकतया सूत्रवैयर्थ्यमापद्येत ।एवञ्चेहापि परिनिष्ठितान्तेन समासे विहिते कुमारीशब्दस्य पूर्वनिपातापत्तिः दुर्वारा इति चेत्, तत्रोच्यते, उपसर्जनमिति महत्याः संज्ञायाः करणात् "अप्रधानमुपसर्जनम्" इति शास्त्रान्तरप्रसिद्धस्याप्यर्थस्य सङ्ग्राहकत्वेन "समासशास्त्रे प्रथमान्तेन निर्दिष्टम्, अप्रधानत्वसमानाधिकरणोपसर्जनपदवत्" इत्यर्थे सम्पन्ने, अप्रधानस्य च ससम्बन्धिकत्वेन किन्निरूपिताप्राधान्यमिति प्रश्ने 'यं प्रति यत् अप्रधानम्, तं प्रति तद् उपसर्जनम्' इत्यर्थेन प्रकृते च राजकुमारीपदार्थं प्रति राज्ञः अप्रधानत्वेन उपसर्जनत्वं भवति

।राजकुमारीश्रित इत्यर्थं प्रति च केवलायाः कुमार्या न उपसर्जनत्वमपि तु राजकुमार्या एव इति न उपसर्जनसंज्ञाप्रसक्तिरिति भावः ।एवञ्च "प्रथमानिर्दिष्टं समास उपसर्जनम्" इति सूत्रस्यार्थः पर्यवस्यति- विधेयतासमर्पकसमासपदघटितशास्त्रार्थघटकीभूतप्रथमान्तपदप्रयोज्यविषयताश्रयः यन्निरूपिताप्राधान्यवत्, तन्निरूपितोपसर्जनसंज्ञको भवतीति ।

**'पूर्वकाय' इत्यत्र दोषः, तत्समाधानञ्च**

नन्वेवं सति पूर्वकायादौ दोषः, यतः पूर्वं कायस्य इति विग्रहे "पूर्वापराधरोत्तरमेकदेशिनैकाधिकरणे"(अष्टाध्यायी, २.२.१) इति शास्त्रेण समासे अनेन समासविधायकशास्त्रघटकप्रथमान्त'पूर्वापराधरोत्तर'पदबोध्यत्त्वेन पूर्वादिशब्दानामुपसर्जनसंज्ञा इष्टा, परन्तु राज्ञः कुमारीं श्रित इति विग्रहे कुमार्याः पूर्वनिपातवारणाय एतत्सूत्रार्थे परिष्कृते सति पूर्वपदार्थस्येह प्रधानत्त्वेनोपसर्जनसंज्ञा न स्यादिति चेत्,न । महासंज्ञाकरणसामर्थ्येन शब्दगतस्याप्रधान्यस्य स्वीकारेणादोषात् ।

अयं भावः – महासंज्ञाकरणादप्रधानरूपोपसर्जनपदार्थोऽपि संज्ञाविधाने निमित्तयाश्रितम् । अप्राधान्यं च बहुविधं भवति । यथा पुत्रेण सहागतः पिता इत्युच्यमाने यद्यपि पितुरागमनस्य पुत्रागमनाधीनत्वेन पुत्रस्यैव स्वतन्त्रत्वात् पित्रागमनप्रयोजकत्त्वाच्च लौकिकं प्राधान्यमस्ति । अत एव ज्येष्ठस्य कनिष्ठेन सहागमने सूचिते ज्येष्ठे मुखमालिन्यादिकमवलोक्यते ।तथापि शास्त्रीयस्य शाब्दगुणक्रियान्वयित्वाभावरूपस्याप्रधान्यस्य पुत्रे सत्त्वात् तत्र "सहयुक्तेऽप्रधाने"( अष्टाध्यायी, २.३.१९) इति शास्त्रेण तृतीया विधीयते । एवञ्च अप्राधान्यं बहुधा प्रसिद्धमपि इह शास्त्रे लौकिकमप्राधान्यमाश्रीयते । यथा हि "द्वितीयाश्रितातीतपतितगतात्यस्तप्राप्तापन्नैः" इति शास्त्रस्य द्वितीयान्तं श्रितादिप्रकृतिकैर्सुबन्तैः सह समस्यते, स च तत्पुरूषः इत्यर्थः । इह च सहार्थयोगेन यद्यपि श्रितातीतपतितादिशब्दानां शाब्दगुणान्वयित्वाभावरूपमप्राधान्यं विद्यते, तथापि पूर्वोक्तरीत्या साहित्यानुयोगित्त्वरूपमप्रधान्यं द्वितीयान्तस्य विद्यते इत्यतः अप्रधानद्वितीयापदबोध्यानां कष्टादीनां पूर्वनिपातः भविष्यति । एवञ्च "प्रथमानिर्दिष्टं समास उपसर्जनम्" इति सूत्रस्यार्थो भविष्यति समासविधायकशास्त्रघटकाप्रधानप्रथमान्तपदबोध्यम् उपसर्जनसंज्ञकमिति । पूर्वं कायस्य इत्यत्र समासविधायके "पूर्वापराधरोत्तरमेकदेशिनैकाधिकरणे" इति शास्त्रे च एकदेशिना इति सहार्थयोगे तृतीया विद्यते, अतः तेन साहित्यानुयोगिनः पूर्वापराधरोत्तरपदस्याप्रधानत्त्वसूचनात् साहित्यानुयोगित्त्वलक्षणमप्रधानत्वं पूर्वादिपदानां विद्यते इत्यतः तेषां पूर्वनिपातः सुकरः । राज्ञः कुमारीं श्रितः इत्यत्र च द्वितीयान्तस्याप्राधान्यात् तस्य च ससम्बन्धिकत्त्वात् यन्निरूपितमप्राधान्यं तं प्रति तत् उपसर्जनम् इति सूत्रार्थेन साहित्यप्रतियोगिभूतश्रितादिनिरूपिताप्राधान्यञ्च राजकुमारीत्यस्यैवेत्यतः न केवलस्य कुमारीशब्दस्य पूर्वनिपातप्रसक्तिरिति बोध्यम् । समासविधायकशास्त्रघटकपदगतस्याप्राधान्यस्य स्वीकारे च एतत्सूत्रस्थं महाभाष्यमेव प्रमाणम् ।तथा ह्यत्र सूत्रे भाष्यम् –"यं (शब्दं) प्रति यत् (प्रथमानिर्दिष्टम्) अप्रधानं तं (शब्दं) प्रति तत् (

प्रथमानिर्दिष्टवाच्यं पदम्) उपसर्जनम्"( महाभाष्यवचनम्,वा.सं-६६०) इति । अत एव भिन्नलिङ्गेन निर्देशश्चरितार्थो भवति ।

**अन्वर्थसंज्ञाविषये आचार्यकैयटमतदूषणम्**

अथ चात्राचार्यकैयटः प्रसिद्धमेवाप्राधान्यं इतरनिरूपितप्रकारताश्रयत्वरूपमाश्रित्य राजकुमारीश्रितः इत्यत्र दोषं न्यवारयत्, परन्त्वेवं पूर्वकायः इत्यादौ अनिष्टप्रसक्तिं विचिन्त्य अन्वर्थसंज्ञायाः सम्भवति स्थले एव समन्वयोऽपेक्षते, न तावता तस्य सार्वत्रिकत्वमपेक्षितमिति प्रोवाच । पूर्वकायादिषु च सूत्रे प्रथमान्तेन निर्देशसामर्थ्यात् तत्र संज्ञाया अन्वर्थत्वाभावेऽपि उपसर्जनत्त्वमिति अर्थगताप्रधान्येनापि इष्टसिद्धिरिति तेषां हृदयम् । परन्तु तन्न युक्तियुक्तम्, यतः "अपदं न प्रयुञ्जीत" इति नियमेन निर्विभक्त्यन्तस्य प्रयोगानर्हत्वात् प्राथम्यादन्वितार्थकत्त्वाल्लघुत्त्वाच्च प्रथमाया उच्चारणेन तत्सामर्थ्यस्य क्षीणत्वेन तेन पूर्वनिपातस्य उपसर्जनत्वस्य वा कल्पयितुमशक्यत्वात् । पूर्वोक्तस्य "यम्, यत्" इति महाभाष्ये भिन्नलिङ्गोपदेशस्यास्वारसिकत्वापाताच्च ।

**द्वितीयसूत्रव्याख्यानम्**

नन्वेवं 'चित्रा गावो यस्य' इत्यादौ बहुव्रीहिसमासे उपसर्जनव्यवस्थैव न सिद्ध्येत्, यतस्तत्र समासविधायकशास्त्रे "अनेकमन्यपदार्थे" (अष्टाध्यायी, २.२.२४) इत्यत्र सहपदाभावेन पूर्वोक्तसाहित्यानुयोगित्वलक्षणस्याप्रसिद्धेरिति चेत्, तत्र "एकविभक्ति चापूर्वनिपाते" इति उत्तरसूत्रेणोपसर्जनत्वात् । तथा हि - "एकविभक्ति चापूर्वनिपाते" इत्यस्मिन् शास्त्रे पूर्वसूत्रात् समास इति पदमनुवर्तते । समासे विहिते च विभक्तेरभावात् एकविभक्त्यन्तस्य वक्तुमशक्यत्वेन समासपदं हि तादर्थ्यात् विग्रहपरमङ्गीक्रियते । एका विभक्तिः यस्य तदेकविभक्ति, अर्थात् एकविभक्त्यन्तं पदम् । एकस्याश्च विभक्तेः सर्वत्र सत्त्वेन एकग्रहणसामर्थ्यादवधारणार्थकत्वेन एका एव विभक्तिः यत्र इत्यर्थः पर्यवस्यति । तथा च –विग्रहे यन्नियतविभक्तिकम्, पूर्वनिपातभिन्नकार्ये करणीये तदुपसर्जनसंज्ञं भवति इत्येतस्य शास्त्रस्यार्थः सिद्ध्यति ।तेन चात्र बहुव्रीहावुपसर्जनत्वं सिद्ध्यति । न च चित्रा गावो यस्य इति विग्रहे उभयोरपि समानविभक्तिकत्वेनान्यत्रापि बहुव्रीहौ प्रथमान्तानामेव समास इति सिद्धान्तेन व्यधिकरणस्थले चोभयोरपि नियतविभक्त्यन्तत्वेन अनियतविभक्त्यन्तस्यालाभेन कथं द्वितीयेनापि उपसर्जनसंज्ञा स्यादिति वाच्यम्, समासापेक्षया नियतविभक्त्यन्तस्य स्वीकारेण चित्रगुं पश्य , चित्रगवे देहीति समस्तस्यानियतविभक्त्यन्तत्वात् तदपेक्षया नियतविभक्त्यन्तत्वं गोपदस्य विद्यत इत्यतः तस्य उपसर्जनसंज्ञायां सत्त्यां "गोस्त्रियोरूपसर्जनस्य" इति शास्त्रेण तस्य ह्रस्वत्वं सिद्ध्यति ।अत एव च "अनेकमन्यपदार्थे" इति सूत्रे भाष्येऽपि 'चित्रगुः' इत्यत्र गोपदस्यानेनोपसर्जनत्त्वमङ्गीकृत्य अनेकग्रहणं प्रत्याख्यातम् । एवञ्च प्रथमे सूत्रे पदगताप्राधान्यस्य स्वीकारे न काप्यनुपपत्तिः, इति बोध्यम् ।

नन्वेवमपि राज्ञः पुरूषस्य (भार्या) इति परिनिष्ठितान्तेन विग्रहे "षष्ठी" (अष्टाध्यायी, २.२.८) इति शास्त्रेण समासे उभयोरपि षष्ठ्यन्तत्वादुपसर्जनत्वेन पूर्वनिपातापत्तिरिति चेत्, न "षष्ठ्यन्तयोः समासेऽर्थाभेदात्प्रधानस्यापूर्वनिपातः" (कात्यायनवार्तिकम्,सं -१४३८) इति भाष्यप्रमाण्येन "षष्ठी" इति शास्त्रस्य भेदमूलकसम्बन्धाश्रयं षष्ठ्यन्तं समर्थेन सुबन्तेन समस्यते इत्यर्थात् येन सुबन्तेन समासः तदर्थनिरूपितसम्बन्धाश्रयीभूतं तदर्थकमेव षष्ठ्यन्तं गृह्यते इत्यतः तादृशञ्चेह राज्ञः इत्येव, पुरूषार्थनिरूपितसम्बन्धार्थकत्त्वात् तस्य, प्रतियोगिन्येव सम्बन्धप्रतीतिरिति सिद्धान्तादिति न कश्चिद्दोषः ।

**संज्ञावैयर्थ्यापादनम्, तत्समाधानञ्च**

अथ केचनाशेरते यत्, संज्ञेयं मास्तु, पूर्वनिपातप्रकरणे 'प्रथमानिर्दिष्टं समासे' इति पठ्यते, तेन उपसर्जनसंज्ञां विनैव पूर्वनिपातसिद्धेः संज्ञाकथनं व्यर्थमिति ।न च उपसर्जनह्रस्वत्वस्यापि एतत्कार्यत्वेन तत्सिद्ध्यर्थम् इयं संज्ञा वक्तव्या इति वाच्यम्, अस्या अभावेऽपि "गोस्त्रियोरूपसर्जनस्य" इत्यत्र लौकिकोपसर्जनस्य ग्रहणेन तेनैव 'चित्रगुः' इत्यादौ ह्रस्वत्वसिद्धेः,इति चेत्, तन्न , तथा सति कुमारीमिच्छन् ब्राह्मणः इत्यर्थे तस्मात् क्यजादिषु कृतेषु निष्पन्ने कुमारीशब्दे ह्रस्वत्वापत्तेः दुर्वारत्वात् ।अथ यदि समासे एव तेन ह्रस्वविधानार्थं तत्रैव 'समासे' इति पठ्यते, तावताऽपि "पोटायुवतिस्तोक.." (अष्टाध्यायी, २.१.६५) इत्यादिना विहिते समासे गोबष्कयणी इत्यादौ गौश्चासौ बष्कयणीति कर्मधारयसमासे बष्कयणीशब्दस्य तारूण्यवाचकत्वेन गुणीभूतत्वेन उपसर्जनत्वात् "गोस्त्रियोरूपसर्जनस्य" इति शास्त्रेण ह्रस्वत्वं स्यात्, सिद्धान्ते तु तत्र पारिभाषिकस्य उपसर्जनत्वस्याभावेन न ह्रस्वत्वप्रसक्तिरिति । यतः न तावदाद्येन शास्त्रेण तत्र उपसर्जनसंज्ञा विधातुं शक्यते, बष्कयणीशब्दस्य प्रथमानिर्दिष्टत्वाभावात् । न वा द्वितीयेन सम्भवति, परिनिष्ठितान्तेनापि समास इति पक्षे 'गवा चानया बष्कयिण्या च' इति तृतीयान्तेनापि विग्रहस्य सम्भवेन समासापेक्षया तस्य नियतविभक्त्यन्तत्वाभावादिति, सर्वलक्ष्यसङ्ग्रहणायोपसर्जनसंज्ञायाविधायकं वचनं परमावश्यकम् सुव्याख्येयञ्चेति शिवम् ।

## उपसंहारः

उपसर्जनशब्दोऽयं शास्त्रीयः लौकिकश्च पाणनीये प्रसिद्धः ।अत एव हि भगवान् पाणिनिः लौकिकार्थस्यापि सङ्ग्रहणाय शास्त्रे उपसर्जनं कृत्रिमत्वेन व्यवजहार । केवलं सूत्रद्वयेनैवेयं संज्ञा विधीयत इत्यतः अनतिगुरूत्वात् सन्दिग्धार्थकत्वाच्चेह लेखे सूत्रद्वयमपि स्फुटं सविस्तरञ्च व्याख्यातम् । आद्यसूत्रेण विधीयमाना उपसर्जनसंज्ञा हि पूर्वनिपातप्रयोजनिका, द्वितीया च उपसर्जनह्रस्वार्थिका विद्यते । यद्यपि प्रथमे सूत्रे पूर्वनिपात एव प्रयोजनमिति नाभिहितम्, तथापि उपसर्जनगोऽन्ते उपसर्जनस्त्रीप्रत्ययान्ते च विधीयमानं ह्रस्वत्वं यत्र तत्र सर्वत्रापि द्वितीयेनैव सिद्धत्वात् न तदर्थं तदिति भावः । एवञ्च पूर्वनिपाते कार्ये महासंज्ञाकरणादेव आद्यसूत्रस्य विधेयतासमर्पकसमासपदघटितशास्त्रार्थघटकीभूताप्रधान प्रथमान्तपदप्रयोज्यविषयताश्रयः यन्निरूपिताप्राधान्यवत्, तन्निरूपितोपसर्जनसंज्ञको भवतीत्यर्थस्वीकारेण पदगताप्राधान्याश्रयणात्

राजकुमारीश्रितः, पूर्वकायः इत्यादिषु न दोषः । द्वितीयसूत्रे च समासापेक्षया नियतविभक्त्यन्तस्य स्वीकारेण चित्रगुं पश्य , चित्रगवे देहीति समस्तस्यानियतविभक्त्यन्तत्वात् तदपेक्षया नियतविभक्त्यन्तत्वं गोपदस्य विद्यत इत्यतः तस्य उपसर्जनसंज्ञायां ह्रस्वत्वं सिद्ध्यति । राज्ञः पुरुषस्य (भार्या) इति परिनिष्ठितान्तेन विग्रहेषु समासविधायकस्य "षष्ठी" इति शास्त्रस्य भेदमूलकसम्बन्धाश्रयं षष्ठ्यन्तं समर्थेन सुबन्तेन समस्यते इत्यर्थात् येन सुबन्तेन समासः तदर्थनिरूपितसम्बन्धाश्रयीभूतं तदर्थकमेव षष्ठ्यन्तं गृह्यते इति न कश्चिद्दोषः । गोबष्कयणीत्यादौ च ह्रस्वत्वप्रसक्तेः सर्वलक्ष्यसङ्ग्रहणायोपसर्जनसंज्ञायाविधायकं वचनं परमावश्यकं सुव्याख्येयञ्चेत्येल्लेखसारः ।

## सन्दर्भग्रन्था


नागेशः, (ई.१९९८), *बृहच्छब्देन्दुशेखरः*, सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः ।

नागेशः, (ई.२०१३), *लघुशब्देन्दुशेखरः* (षड्व्याख्यासमन्वितः), चौखम्बा सुरभारतीप्रकाशनम् ।

पतञ्जलिः, (ई.२०२१), *महाभाष्यम्* (प्रदीपोद्योतसमवेतम्), (प्रथमो भागः), चौखम्बासुरभारतीप्रकाशनम् ।

पतञ्जलिः, (ई.२०२३), *महाभाष्यम्* (प्रदीपोद्योतसमवेतम्) (द्वितीयो भागः), चौखम्बासुरभारतीप्रकाशनम् ।

पाणिनिः, (ई.१९९३), *अष्टाध्यायी,* चौखम्बा सुरभारती प्रकाशनम् ।

भट्टोजिदीक्षितः, (ई.१९९६), *सिद्धान्तकौमुदी (*लक्ष्मीव्याख्यासमन्विता), मोतीलालबनारसी दासः ।

भट्टोजिदीक्षितः, (वि.स.२०१४), *शब्दकौस्तुभः*, चौखम्बासंस्कृतसीरिज आफिस ।

भट्टोजिदीक्षितः, (वि.स.२०७५), *प्रौढमनोरमा* (शब्दरत्नभूषिता), चौखम्बा संस्कृतभवनम् ।

भट्टोजिदीक्षितः, (वि.स.२०७५), *सिद्धान्तकौमुदी*, (रत्नप्रभाव्याख्याभूषिता), चौखम्बासंस्कतसंस्थानम् ।

भट्टोजिदीक्षितः, (वि.सं.२०६७), *सिद्धान्तकौमुदी, (*तत्त्वबोधिनीबालमनोरमाभूषिता), चौखम्बा सुरभारती प्रकाशनम् ।

विश्वनाथपञ्चाननभट्टाचार्यः, (वि.सं.२०७२), *न्यायसिद्धान्तमुक्तावलिः,* चौखम्बा प्रकाशनम् ।